# shrIgokuleshAShTakam 3

# શ્રીગોકુલેશાષ્ટકમ્ ૩

## Document Information

Text title : gokuleshAShTakam 3

File name : gokuleshAShTakam3.itx

Category : vishhnu, krishna, puShTimArgIya, aShTaka, kRiShNarAya

Location : doc_vishhnu

Author : kRRiShNarAya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીગોકુલેશાષ્ટકમ્ ૩

(માલિની વૃત્તમ્)

યતિવશધરણીશે ધર્મલોપપ્રવૃત્તે
હરિચરણસહાયો યઃ સ્વધર્મં જુગોપ ।
વિહિતભજનભારો ધર્મરક્ષાવતારઃ
સ જગતિ જયતિ શ્રીવલ્લભો ગોકુલેશઃ ॥ ૧॥

અસદુદિતવિદારી વેદવાદાનુસારી
યદુચિતહિતકારી ભક્તિમાર્ગપ્રચારી ।
રુચિરતિલકધારી માલધારી તુલસ્યાઃ
સ જયતિ જયતિ શ્રીવલ્લભો ગોકુલેશઃ ॥ ૨॥

બહુવિધિજનનર્મપ્રોક્તિબાણૈરધર્મઃ
પ્રકટમયતિ મર્મસ્ફોટમારાદ્વિધાય ।
વપુષિ ભજનવર્મ પ્રાપ્ય કલ્યાણધર્મઃ
સ જયતિ નવકર્મા ગોકુલે ગોકુલેશઃ ॥ ૩॥

નિગમજનિતધર્મદ્રોહિણિ ક્ષોણિનાથે
સકલસહજવેશસ્તત્સમીપં સમેત્ય ।
તદુચિતમદમત્યા દત્તવાનુત્તરં યઃ
સ જયતિ જનચિત્તાનન્દકો ગોકુલેશઃ ॥ ૪॥

અધિકૃતયુગધર્મે વર્ધમાને સમન્તા-
દનિતશરણોઽસૌ વેદધર્મો સદાભૂઽત્ । check
તદિહ શરણમાગાદ્યઃ સદૈકઃ શરણ્યં
સ જયતિ જનવન્દ્યો ગોકુલે ગોકુલેશઃ ॥ ૫॥

કલિવૃષલભયાપ્તૌ તત્કલિં સન્નિગૃહ્ય
ક્ષિતિપતિરવિતાઽઽસીદ્યસ્ય પૂર્વં પરીક્ષિત્ ।

ઇહ હિ નૃપતિભીતૌ તસ્ય ધર્મસ્ય નિત્યં
સ જયતિ ભુવિ ગોપ્તા ગોકુલે ગોકુલેશઃ ॥ ૬॥

પ્રથમમિહ પરીક્ષિદ્રક્ષિતો વર્ણધર્મઃ
પુનરપિ કલિકલ્પક્ષુદ્રભિક્ષુક્ષતોઽભૂત્ ।
અભયપદમિદં યં શાશ્વતં ચાભ્યુપેતઃ
સ જયતિ નિજભક્તાહ્લાદકો ગોકુલેશઃ ॥ ૭॥

ય ઇહ સકલલોકે કેવલં ન સ્વકીયે
પ્રભુજનનબલેન સ્થાપયામાસ ધર્મમ્ ।
સકલસુખવિધાતા ગોકુલાનન્દદાતા
સ જયતિ નિજતાતારાધકો ગોકુલેશઃ ॥ ૮॥

શ્રીવલ્લભાષ્ટકમિદં પઠતિ પ્રપન્નો
યઃ કૃષ્ણરાયકૃતમિત્યુષસિ સ્વચિત્તઃ ।
સોઽયં સુદુર્લભતમાનપિ નિશ્ચયેન
પ્રાપ્નોતિ વૈ વિનિહિતાનખિલાન્ પદાર્થાન્ ॥ ૯॥

ઇતિ શ્રીકૃષ્ણરાયવિરચિતં શ્રીગોકુલેશાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIgokuleshAShTakam 3*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*